**संस्कृत वार्ता:**

**दिनाङ्क** :- 08.05.2026 **प्रात:** - 06:55

**<u>अमित शाह</u>**

केन्द्रीयमन्त्री अमितशाहः अद्य कोलकाता-नगरं सम्प्रास्यति। तस्य भाजपादलस्य नवनिर्वाचित-विधायकैः सह एकस्मिन् उपवेशने भागग्रहणस्य कार्यक्रमो वर्तते, अस्मिन्नवधौ दलस्य विधायकनेतुः चयनं भविष्यति। पश्चिबङ्गालस्य राज्यपालः आर्. एन. रविः ह्यः पश्चिबङ्गालस्य विधानसभां भङ्गम् अकरोत्। राज्यस्य नवमुख्यमन्त्री मन्त्रिपरिषदः च श्वः कबिगुरु- रबीन्द्रनाथ – टैगोर – वर्यस्य जयन्त्यवसरे शपथवचनं स्वीकरिष्यन्ति। भारतीय-जनता-पार्टीति दलस्य विधायकदलस्य नेतुः चयनम् अद्य कोलकातायाम् एकस्मिन् उपवेशने भविष्यति, यस्य अध्यक्षतां केन्द्रीय-गृह –सहकारितामन्त्री अमितशाहः करिष्यति। भाजपादलस्य सर्वे नवनिर्वाचित - विधायकाः उपस्थिताः भविष्यति।

**<u>केरलम</u>**

केरलमराज्ये, एआई सी सी इत्येतस्य पर्यवेक्षकैः प्रस्तुतप्रतिवेदनेभ्यः परामर्शानन्तरं नवदिल्ल्यां काङ्ग्रेसद्वारा राज्यस्य नवमुख्यमन्त्रिविषये निर्णयस्य घोषणा भविष्यति। केपीसीसी इत्येतस्य अध्यक्षः सनी जोसेफ उक्तवान् यत् ह्यः तिरुवनन्तपुरम इत्यत्र जातस्य विधायकदलस्य उपवेशने एआईसीसी इत्यस्य अध्यक्षाय काङ्ग्रेसविधायकदलस्य नेतुः चयनायाधिकारप्रदातुमं एकः प्रस्तावः सर्वसम्मत्या अनुमोदितः। असौ एतदपि उक्तवान् यत् दिल्लीं प्रत्यागताः पर्यवेक्षकाः स्वीयनिष्कर्षान् दलस्य राष्ट्रियनेतृत्वाय समर्पयिष्यन्ति।

**<u>असम</u>**

असमराज्ये भाजपेतिदलस्य नेतृत्वयुतं एनडीएप्रशासनम् अस्य मासस्य द्वादशे दिनाङ्के निरन्तरं तृतीयवारं शपथवचनं ग्रहीष्यति। भाजपेति दलस्य वरिष्ठनेतृणाम् उपस्थितौ अद्यः गुवाहाट्यां शपथग्रहण-समारोहस्य सम्बन्धे एकम् उच्चस्तरीयं सज्जतासम्बद्धोपवेशनम् आयोजितम् आसीत्। उपवेशनानन्तरम् एकं वार्ताहरसम्मेलनं सम्बोधयन् राज्य-भाजपाध्यक्षः दिलीप-सैकिया संसूचितवान् यत् शपथग्रणसमारोहं गुवाहाट्याः खानपारा-स्थलस्य पशु-चिकित्सा- महाविद्यालस्य क्रीडाङ्गणे आयोजयिष्यते। असौ उक्तवान् यत् प्रधानमन्त्री नरेन्द्रमोदी अस्मिन्-कार्यक्रमे मुख्यातिथिरूपेण सम्मिलिता भविष्यति।

**<u>गोयल</u>**

वाणिज्योद्योगमन्त्री पीयूषगोयलः नवदिल्ल्यां वाणिज्यविभागस्य उद्योगान्तरिक-व्यापार-संवर्धन-विभागस्य च अधिकारिभिः सह विचार-विमर्श-सत्रस्य अध्यक्षतां कृतवान्। सामाजिकसञ्चारपटले एकस्मिन्

लिखिते सन्देशे श्रीगोयलः उक्तवान् यत् निर्यातस्य निवेशस्य च वर्धनाय, आकाङ्क्षि-निर्यातकेभ्यः अवसरान् उद्घाटयितुं, नव-वैश्विक-विपणिनाम् उपयोगय च चर्चा केन्द्रिता आसीत्।

**<u>सिन्धिया</u>**

सञ्चारमन्त्री ज्योतिरादित्य-सिन्धिया अद्यारभ्य महाराष्ट्रस्य द्विदिवसीय-आधिकारिक-यात्रायां भविष्यति। अस्यां यात्रायां प्रैष्यविभागेन सम्बद्धैः प्रमुखकार्यक्रमैः सहैव मुम्बई-पुणे-नगरयोः प्रमुखशैक्षणिक-सार्वजनिक-कार्यक्रमेषु सहभागिता सम्मिलिता भविष्यति। सञ्चारमन्त्रिणा देवेन्द्र-फडणवीस इत्यनेन सह मुम्बय्याम् अन्धेरी-रेल-स्थानक-उप-प्रेषालयस्य उद्घाटनं करिष्यति।

**<u>आकाशवाणी</u>**

आकाशवाणी स्वीय नवतितमस्य वार्षिकोत्सवस्य अवसरे अद्य राष्ट्रियराजधान्यां मैराथन इत्यस्य आयोजनं करिष्यति। प्रायः सार्धत्रि-किलोमीटरमितं मैराथन इत्येतत् आकाशवाणीभवनात् आरभ्य कृषिभवनं, रेलभवनं आरबीआई भवनं च गच्छति। आकाशवाण्याः दूरदर्शनस्य प्रसारभारत्याः च कर्मचरिणः स्वीयपरिवारस्य सदस्यैः च सह अस्यां मैराथन-क्रीडायां भागं ग्रहिष्यन्ति।